# 16. अजेयः स भविष्यति

[The following verses have been taken from 'Nitisaara' composed by Chanakya and is mostly advice about polity. Chanakya did not accept the idea that politics could be separated from the family and society. Hence, he included many aspects of human life in his advice about polity.

Chanakya always stressed on the fact that if man is rational and learns to look at the world, then all the things and events of the world can become means to make his life practical and happy. By following these, man can make his life perfect.

We may divide the animals around us into good and bad classes but person like Chanakya found something to learn from each one of them. It is in one such incident that Chanakya found qualities to be learnt from different creatures around us – one from the lion and crane, six from the dog, three from the donkey, five from the crow and four from the cock. These are described in the verses selected here.

In order to make one's life successful and develop one's personality man should be able to inculcate these twenty qualities and follow them in life. From this lesson, we also learn that instead of finding fault with the animals, there are many things that we can learn from them.]

---

सिंहादेकं बकादेकं षट् शुनः त्रीणि गर्दभात् ।
वायसात्पञ्च शिक्षेच्च चत्वारि कुक्कुटादपि ॥ 1 ॥
प्रभूतमल्पकार्यं वा यो नरः कर्तुमिच्छति ।
सर्वारम्भेन तत्कुर्यात् सिंहादेकं प्रकीर्तितम् ॥ 2 ॥
सर्वेन्द्रियाणि संयम्य बकवत् पतितो जनः ।
कालदेशोपपन्नानि सर्वकार्याणि साधयेत् ॥ 3 ॥
प्राप्ताशी स्वल्पसंतुष्टः सुनिद्रः शीघ्रचेतनः ।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः श्वगुणा हि षट् ॥ 4 ॥
अविश्रामं वहेद् भारं शीतोष्णं च न विन्दति ।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्दभात् ॥ 5 ॥
गूढगार्हस्थ्यचातुर्यं काले चालयसंग्रहम् ।
अप्रमादमनालस्यं पञ्च शिक्षेत वायसात् ॥ 6 ॥
युद्धं च प्रातरुत्थानं भोजनं सह बन्धुभिः ।
स्त्रियमापद्गतां रक्षेत् चतुः शिक्षेत कुक्कुटात् ॥ 7 ॥
य एतान् विंशतिगुणान् आचरिष्यति मानवः ।
कार्यावस्थासु सर्वासु अजेयः स भविष्यति ॥ 8 ॥

## Glossary

**Noun : (masc.) : गर्दभः** donkey **वायसः** crow **कुक्कुटः** cock **बन्धुः** relative

**Pronoun : एतान्** to these (masc. plural) **सर्वासु** among all (in all) (fem. plural)

**Adjective : सुनिद्रः** having sound sleep **शीघ्रचेतनः** who awakes immediately

**Adverb : प्रभूतम्** much, abundant **बकवत्** like a stroke (crane)

**Compound :** कालदेशोपपन्नानि (कालः च देशः च इति कालदेशौ, इतरेतर द्वन्द्वः । कालदेशाभ्याम् उपपन्नानि कालदेशोपपन्नानि । तृतीया तत्पुरुष) । स्वल्पसंतुष्टः (स्वल्पेन संतुष्टः स्वल्पसंतुष्टः । तृतीया तत्पुरुष) । प्रभुभक्तः (प्रभोः भक्तः प्रभुभक्तः । षष्ठी तत्पुरुष) । शीतोष्णम् (शीतम् च उष्णम् च शीतोष्णम् । समाहार द्वन्द्व) । आलयसंग्रहम् (आलयस्य संग्रहः आलयसंग्रहः, तम् । षष्ठी तत्पुरुष) । कार्यावस्थासु (कार्याणाम् अवस्था कार्यावस्था, तासु । षष्ठी तत्पुरुष)

**Participle : कर्तुम् (कृ + तुम्)** । **संयम्य (सम् + यम् + त्वा > य)** ।

**Root : Sixth Gana** (Parasmaipada) **विद् (विन्दति)** to get, to attain

## Notes

**(1) Meaning : सिंहादेकम्** one from lion **बकादेकम्** one from crane **शुनः** from dog **कुक्कुटादपि** even from cock **प्रकीर्तितम्** is said **कुर्यात्** should be done **कालदेशोपपन्नानि** are obtained (got) with reference to country and time (period) **साधयेत्** should be accomplished **प्राप्ताशी** one who eats what is available **श्वगुणाः** qualities of a dog **ज्ञातव्याः** should be known **अप्रमादम्** carefully, without carelessness **स्त्रियमापद्गताम्** to a woman in difficulty

**(2) Sandhi :** सिंहादेकम् (सिंहात् एकम्) । बकादेकम् (बकात् एकम्) । कुक्कुटादपि (कुक्कुटात् अपि) । शूरश्च (शूरः च) । स्त्रियमापद्गताम् (स्त्रियम् आपद्गताम्) ।

## Exercies

**1. विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) सिंहात् कति लक्षणानि शिक्षेत् ? ◯

(क) एकं लक्षणम् (ख) द्वे लक्षणे (ग) त्रीणि लक्षणानि (घ) बहुलक्षणानि

(2) प्रभूतम् शब्दस्य विरुद्धार्थकः कः शब्दः । ◯

(क) शीतम् (ख) अल्पम् (ग) उष्णम् (घ) विभूतम्

(3) गर्दभः अविश्रामं किं वहति ? ◯

(क) गुणम् (ख) भारम् (ग) भागम् (घ) अन्नम्

(4) काकशब्दस्य कः पर्यायः ? ◯

(क) रासभः (ख) कोकिलः (ग) वायसः (घ) केसरी

**2. उदाहरणानुसारं शब्दरूपाणां परिचयं कारयत ।**

| | शब्दरूपम् | मूलशब्दः | प्रकारः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| **उदाहरणम् :** | सिंहात् | सिंह | अकारान्तः | पुल्लिङ्गम् | पञ्चमी | एकवचनम् |
| (1) नरः | .......... | .......... | .......... | .......... | .......... | .......... |
| (2) कार्याणि | .......... | .......... | .......... | .......... | .......... | .......... |
| (3) बन्धुभिः | .......... | .......... | .......... | .......... | .......... | .......... |
| (4) भारम् | .......... | .......... | .......... | .......... | .......... | .......... |

**3. गुर्जरभाषया उत्तराणि लिखत ।**

(1) What should a man learn from a crane and a crow ?

(2) What qualities does a donkey have ?

(3) What should a man (person) do to be victorious in any situation ?

**4. श्लोकपूर्तिं कुरुत ।**

(1) प्रभूतमल्पकार्यम् ............... प्रकीर्तितम् ।।

(2) प्राप्ताशी ............... शुनो गुणाः ।।

**5. अनुवादं कृत्वा अर्थविस्तारं कुरुत, तस्य बोधं च लिखत ।**

(1) सर्वेन्द्रियाणि संयम्य बकवत् पतितो जनः ।
कालदेशोपपन्नानि सर्वकार्याणि साधयेत् ॥

(2) अविश्रामं वहेद् भारं शीतोष्णं च न विन्दति ।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत् गर्दभात् ॥

(3) युद्धं च प्रातरुत्थानं भोजनं सह बन्धुभिः ।
स्त्रियमापद्गतां रक्षेत् चतुः शिक्षेत कुक्कुटात् ॥

## Activity

- Prepare a list in Sanskrit of animals and birds.
- Observe animals and birds you like and note down their characteristics.
- Visit a zoo situated in your town or elsewhere.
- Prepare an album of beasts and birds.

●